राघवनैषधीयं सटीकम्

५४२

३१८७ [illegible]

३८ पत्र

सं० ४९२:५

सं० ५६२

\+ लि०

श्रीगणेशाय नमः ॥ अभिवंद्य परात्मानं गीर्देवीं च गुरूनपि । विवृणोमि श्रीरामो नैषधीयं निजेच्छया ॥ १ ॥ शिष्टा
चारपरंपराप्राप्तश्रुतिमूलकशिष्टशिक्षादक्षमांगलिको हामसमनुबध्नन्कथ्यपावनामभगवत्पिरव
तो नलगुणकथनमंगलाचरणं पौरस्त्यपुराणश्लोकस्तवनबुद्धिमंगं ग्रंथकारः प्रथमं प्रकार इत्यारभते नतु मंगलस्यावि
पत्त्वात्तन्नवश्यापेक्षायामाह आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति त्रिधा अत्र वस्तुनिर्देशात्मके मंगले विनायते ग्रं
थपरिसमाप्तिर्नेत्यनम् मनोभिरेवृतिन ग गणस्यामित्रत्वे नानंदः पत्रमे सोढ्यवसतु अतो न दूषणप्रक्षेपः दोषः सोऽप्यभि
तिश्रीनारायणमहाविकायांदकारस्य पूर्वं न्यासः पंगलादाहत्यमावक्षेन अवर्णो तस्मन्निर्भवतीति अकारपामि
अदकारपाठः किमेतावता नायणेसनेनेति चेत् अक्षरोपस्थितुहेतुना यकोऽभूतिमन् इति इति ग्रंथसमस्तमेपफलवत्रात्रिः
सानुषंगित्वेनप्रोत्तमपाठकर्तॄणां च फलातिशयनंदोभवतीति इत्यादि इति नाम्नावीरसेनः क्षितीपा क्षिति
तलविबुधानां वेदप्रागल्भ्ये गुरुकविबुधजोषसाम्नोनारदाः सनि नरपतिरत्नेमसेलोकोपनाकीत् १
प्रावृत्तधरणीतिक्षितिभोगो बभूव कथं भूतः वीरसेनः वीरसेनाय सत्संगतो वीरश्च विक्रांतः इत्यमरः त्रिलिंगो
यं गोहितो हितहि तत्त्वः स्त्रियामनुवादितं च पूर्वं सद्रूपत्वम् आरवीरविक्रांतौ सेरादिकोधाल् पचाद्यच् एतेना
मी किंनी सेनेति उदाहरणम् इत्यनिवर्तिनी सेनेति ध्वनितं तथास्मृतिश्च हातिमोपुरुषो लोके सूर्य्यमंडलभे
दिनौ परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः वरं वेमवचापदोतदिति गुरुत्वं पुनः कथं क्षितितलविबु

धानां वंद्यः क्षितितले विबुधा इव ब्राह्मणाः आश्रमो स्त्री द्विजात्यग्रजन्मभूदेववाडवा इति कोशः रूपकालंकारः उपमितं
व्याघ्रादिभिरिति समासः तेषां विप्राणां वंद्यौ तौ नमस्कृतौ च वदि अभिवादनस्तुत्योरिति अर्थद्वयनिर्देशात् शीङ्शापि
रुगाभिर्वादिक्षीविशा...शिभ्योथः वंदतेरनेन सूत्रेणाथप्रत्ययः यदा कर्तरि तदा स्तोतारो नमस्कर्तारो ज्ञेयः यदा कर्मणि तदा स्तु
त्यौ नंतव्यावितिभावः कर्मणि वा क्षिताविति क्षि निवासगत्योः क्षियेतिभूतास्मिन्निति संज्ञायां क्तिन् वंद्योद्वयोः पादीनां नाहं सर्वेषां
संपन्नानामन्नत्वे जायते इति विशेषाभिलेकारः साकूतसर्वविशेषणत्वात् परिकरश्च विबुधइति इगुपधज्ञाप्रीकिरः कः
तिकप्रत्ययः ... रोगाति कारकपूर्वस्यापि यहणं पुनः कथं० गुरुकविबुधजोषः रूगो ... निरूपसय गृणाति हितं
शिष्यायेति गुरुः गुरुश्च कविश्च बुधश्चेति द्वंद्वः जोषणं जोषः तेषां जोषणं यस्य स इति बहुव्रीहिः जुषी प्रीतिसेवनयोः
हलश्चेति घञ् कर्तरि कप्रत्ययप्रसंगात् गुरुर्वशिष्टः कविर्वाल्मीकिः बुधः पंडितजनः जातं ख्यायामेकत्वं तेषां नित्यसे
वकः पुनः कथं साम्रतः अमृतेन सहवर्तत इति साम्रतः सोपसर्जनस्येति सहस्य सः अमृतं विघसो यज्ञशेषभोजनशेष
योरित्यमरः अमृतं यज्ञशेषे सामी पृषसलिलेघृते इति मेदिनिः यज्ञशेषभुगित्यतास्यार्थः पुनः कथंभूतः नारदाद्यैः
नराणां सम्मतो नारः तमस्य समूहः तद्यया तस्मै ददतीति नारदाः दानशौंडास्ते सभायां यामा भो पुरुषार्थः यत्सर्वीस्थानस
भायां महोदारा एवंविधा आसन् तेषां धर्मिणा स्वेनिखिद्भृत्यात् आत्मनाम गुरोर्नामनामातिकृपणस्यच श्रेयस्कामोन
गृह्णीतज्येष्ठापत्यकलत्रयोरिति स्मृतेः तस्मिन्नरपतिरत्नेसतिनर्मलो कोप्यर्ये अजानीत रत्नेस्वजातिश्रेष्ठेपिवनेस

रा.ने.टी
२
२

लिल्लकानने इति तारीयीसवचनं नाकस्याचारीत् सर्वप्रातिपदिकेभ्यः क्विप् एवा वक्तव्य इति क्विप् सनाद्यंता इति धातु
त्वम् लुङ् नहि मर्त्यलोकस्य स्वर्गसाम्यं जातु भवति वैधर्म्यात् तत्रत्यानां साधर्म्यस्य सुपमा घटते अतिरेकश्च कुतः स्यात् इ
त्याशंकायामाह श्रियविशेषणाभ्यां तस्मात् स्वर्गस्य साम्यं भवत्येव स्वर्गे गुरुर्बृहस्पतिः कविः शुक्राचार्यः बुधो ग्रहश्च
द्विः श्रमृतपानं तेषां नारदो देवर्षिरपि तत्र विद्यते अत्र एवमत्रापि सर्वं विद्यते एवं सति स्वर्गसाम्यं भूलोकस्य अधिकं दाभ
वाहुल्यं पर्यसीत्यत आह श्लेषोपमालंकारो विलसतीति निविडं कुर्वन्तु सहृदयाः वादे लोपे समासे साकम्भो धारस्य निकाडि क
र्मकर्त्रीः समुद्रे वेतादि लोप विक्रिप् समासेत्येति काव्यप्रकाशे निरूपितं इदानीमत्रैव पद्ये चमत्कारधारामपारां वर्षती नलक
थामपि कविरवातीतरत् एवं सर्वं भाग्यैर्वोत्तीर्व्यतिक्रमेण नलपक्षे इति योजनिका प्राकृतान्मा वीरसेन इति द्वि
तीयोल्लेखवव प्राकृतयुगे नामेति प्रश्नस्य [illegible] उपसंख्यानमिति तृतीया ख्यायते भस्य प्रातेः इति नाम नामन्नीमन्नितेयादि
नासूत्रेण निपात्यते वीरसेन नामा नलस्य पिताभूत् क्षितेरीशो राजा कथंभूतो वीरसेनः दशरथः दशाशुरथो यस्य
नो यस्य सः इति बहुव्रीहिः यद्वा दशदर्शनोकनयोरिति आकुसीयो धातुः दश संख्यके शासको रादले कारया दसः पा
तु दंशकोरथो यस्य स इति बहुव्रीहिः दंसेः पचाद्यच् [illegible] इत्युक्तत्वात् यद्वा तेनातिक्रामति रथेन ना
तिक्रामति रथयति दशानां दंशकोकुनोकुटिलानां रथेनातिक्रामकः तस्यार्थः दशानां ज्ञानकर्मेन्द्रियाणां रथः प्रवर्तक इव
मनसः सारथित्वात्साधान्यं साक्षान्नानोरूपद्वे निरूपकं यद्वा दानेदः घञर्थे कविधानं दानेरक्षणे वितरणे वा [illegible]
ख्यायेतीति [illegible] दैत्यराक्षसाः नहुषकोरथो यस्येति [illegible] इति फलितोऽर्थः देहूरक्षणे इदम्राने होयातवैः

श्री

राम
२

तेपतः तथा गुरुः सुमतिः जातूकर्ण्योऽस्य दस्य कविः बुधः शास्त्रव्याख्याता पंडितः नेषां जोयः सेवनं यस्य सः इति नलपक्षे
ध्यान्यसमानमिति १ रामोऽभिरामः सनलः प्रतीतः पुत्रो भवन्नस्य सुसत्यसंधः सलक्ष्मणः सद्गुरतः सशत्रुघ्नः हृव्याकृतिर्विध
त्वंगतवानिवेकः २ रामपूर्ति नस्य रामः पुत्रोऽभूत कथंभूतः सलक्ष्मणः सद्गुरतः सशत्रुघ्नः हृ आश्चर्यम् वे
तिनिश्चये वास्यादिकलोपमयोरेवार्थेपि समुच्चये इति विश्वः एकः स्यमेवाद्वितीयं ब्रह्मेति श्रुतेः रामरूपे रामं वि
द्धि परंब्रह्मेति वचनात्परमात्मत्वं व्यासवाक्यानां शिरोधार्यत्वात् चतुर्विधत्वं गतवान् ब्रह्ममायाशबले जगदु
पादानकारणमिति वेदांतिराद्धांतः नचैतनद्भुतं प्रकृतिपुरुषयोः भयपुत्रो भवेत्ययुक्तं तैत्यादि वेदश्रुति व
चनैव एवं सति आत्मानं चतुर्विधं चतुर्धा-इत्यादितिभावः वास्तवमेकं त्वं गतोपि भगवानवतारकल्पयन्भूभा
रहरणार्थं तावदादृष्टे कथंभूतो रामः अभिरामः सुंदरः नैगमेष्वेदो वल्लेरामोनीलेवा रुसितेत्रिषु इत्यमरः अभिः
परितोभावे वर्तते पुनः कथं० सनलः षषग्यदाने तानादिकः षः सः सन्नंति विशेषभोददंतीति हिरण्यं पेत्र सनाः एवा
घन् आहृतिगणत्वात् तान्लातिस्वीकरोतीति संभावनायां सनलः आतोनुपसर्गेकः यद्वा सनिरध्येषणात्मस
का सूर्वकेण्वादिव्यापारः सन्निकुर्वंति सनयंतितेसनाः टिलोपः तान्लातिगृह्णातिइतिताहृशः इदाश्रिमद्
निभावः पुनः कथं० प्रतीतः [illegible] ख्यातेहृष्टे प्रतीतेभिजातस्तुकुलजेजनेहृतिकोशः ख्यातोदिक्षु लोकत्रये पुनः कथं०
सुसत्यसंधः अतिशयेन सत्य संधा प्रतिज्ञा यस्य सः सत्य प्रतिज्ञः इति नामधारकैः दासेश्चप्रत्ययः स्यहेतिनार्णीयेके स

रा. नै. टी.
३
3

स्तीव वनि भेरइतिव रामोऽद्विर्नाभिभाषते इत्य[illegible]याते अन्यस्तत्र येव लक्ष्मणं धन्यते सुरा वेदे नेति वो
ध्यम् पुनः कथं० सलक्ष्मणः लक्ष्मणसंज्ञभ्रात्रा सहितः पुनः कं० सभरतः भरतात्मभरतभ्रात्रा कैकेय्यभिप्रायः स
इति तो यस्य स इति बहुव्रीहिः पुनः कथं० सशत्रुघ्न शत्रुघ्नभ्रात्रा सहितः वोपसर्जनस्येति समासः गुरुरेव श्रीमान्
एवं गुरवश्च तेषां निरूपिता इति नामानि चकारेत्यर्थः दशरथस्य लोकपालाइव चत्वारः पुत्रा अभूवन्नित्यर्थः
पूजितः रम क्रीडायां अकर्तरि च कारके संज्ञायामित्यधिकरणे घञ् प्रत्ययः रमन्ते योगिनो ह्यस्मिन्निमान
द्विविधानि इति रामपदेनासौ परंब्रह्माभिधीयते इति कालांतरकोपदेशमेत्यप्ययमेव बोध्यः भगवानपि
यमुग्रत्वमंगीचक्रे न स्वप्रकाशत्वेन साधिगुरावतां कोविदैर्यितुं पार्येदित्यपि धन्यते इदमुग्रमप्रतिशयिनिर्थे ग्ये
वाच्यार्था निर्बुधैः कथितः इति भक्तिरसत्वं साक्षात् एवं रूपमुग्रमकाव्ये रसानुगुण एव वर्णगुंफिताः नलक्ष
णेनुग्रम् नस्यवीर्येतेन समसनलः पुत्रो अभवत् स्वदाक्षीना बुद्धिस्थपदार्थपरामर्शकत्वात् न सेदमित्यादि
ज्ञापकात् न च रूढः प्रसिद्धार्थकः ते तो को प्रसिद्धः प्रक्रांतप्रसिद्धानुभूतार्थस्य रूढोय रूढोपादानेनापेक्षते इ
त्युक्तं काव्यप्रकाशे कथं० राम ए:पाव के वनी क्षोचराः स्मृतः स्वकीविहायोरिति विप्रः एपावकं स्यमतिसेवत इतिरा
मः सदाहिताग्निरिति नामस्यार्थः अमगमादिषु गतेः पदयोः शत्रुसंभक्षोरादिषाद्धेनग्रह इति दीक्षिताः अम
तेः पचाद्यच् पुनः कथं० अभिरामः सुंदरोत्यर्थः प्रतीतो हृसन्तुरवः ख्याते हृष्टेः इति कोशेतथा इष्टानात् प्रतिप

राम
३

वोदिताः कतीत्यिके: संपूर्वो द्रवत्यात् श्रोपसर्गे इति कर्मण्यच् लक्ष्मीवाँश्चदक्षः स्याः श्रीलत्वमरः श्रमाता
दिभिर्लक्ष्मीवद्भिर्युक्तो इत्यर्थः पुनः कथं॰ सद्रावतः विभर्तीति भरः उभयर्थ्यावास्तीपोषसायोः तस्मभावस्त्वमतो श्र
ह्रतिजन्यबोधप्रकारस्तत्वार्थः सता सा ध्रूता पोषकता यस्य स इति बहुव्रीहिः उपसर्जनह्रस्वत्वम् श्रपोन्यतर
स्यामितिविकल्पस्तु कस्पेव श्रसाधुपोषकत्वं धर्म्मेणा ह्वे ग्रताख्यातम् तथाच [illegible] धर्म्मावबोधान्मु दकमंत्रो
पकरणाम्यान् कृत्वा वोरस्मया ह्रतुर्जानतो [illegible] नम इति श्रतएवश्रदांतान्दमपेदिति [illegible] ति: धिश्रपा
लनेरयुषनि ग्रहमंतरेणानसंभवतीति [illegible]: सर्वत्रसमंगाभंगाशब्दश्लेषोपमालंकारः के चित्पदेषु
श्लेषितिप्रत्ययश्लेषः शाब्दोनरसं वादित्वेनाभि हितवर्णलं सर्वं साकूविशेषणत्वेन परिकरश्च संसृष्टिरर्थालंका
रीयारसध्वनिश्चात्रवीयः एकोपिनलो लक्ष्मणादिभेदत्रयमवयाह्यचतुर्विधत्वं प्राप्नवानिवेत्युत्प्रेक्षालंकारः
संभावनमथोत्प्रेक्षाप्रकृतस्य समेन यत् इतिभा [illegible] इवशब्दोत्रव्यंजकः उपजातिश्छंदः त्रिष्टुप्जगतीसांके
र्यात् पुन्नाम्नरकन्नायतेत्युत्पद्यत इति पुत्रशब्दव्युत्पत्तिः पुनातीतिवा पुत्र इति [illegible] श्रीवा [illegible]
निदिक् श्रात्मपुत्रो सस्तुहितत्व्या मितिस्तुत्रं यद्धा भगवान्याच विभर्तीतिश्रातापातीतिपिता मान्यत इति
माता पुनातीतिपुत्र इति २ स हत्वस्सर्वेकमघपुरुषो ह्युहिंसीरदर्पो हरणायंधात्री भात्रीत्रतोपा घसम्
भुद्दायिक्षोणीतलेमहद्यनः सएकः ३ सहत्वेति धात्रात्क्षोणीतलेसएकः समभ्युदाय इवात्रधारणा

रा·नै·टी·
४

५

पुष्णातीति

पोषणयोः दधातिप्रजाः पोषयतीतिधाता तेन पृथिव्यां सप्रसिद्धः श्रुत्यादिषु सिद्धः एकः एकमेवाद्वितीयं
ब्रह्मेति श्रुतेः अद्वितीयश्चिदात्मा भगवान् रामः समस्तु दायि [illegible] एकदेशोऽप्यनन्त इत्यर्थः सूक्ष्मरूपः समीचीनविचारेण ष
ममिपश्येद्दृश्यते कर्मयोगिभिर्विया उदयमाने शीतलवान् सत्त्वैकिकर्मयोगिना लुब्धि गम्यर्थाः प्रापकत्वे उदयार्थाभि
धायकात्प्रतिभ [illegible] कोशेऽङ्के अत एव उदयाति वितनोद्गरश्मिरहस्यानि [illegible] किंभूतः सः सदयनः दय दान
गतिरक्षणहिंसादानेषु गावेस्तु सतां दयने रक्षा यस्य सः परमकारुणिक इत्यर्थः कस्मै प्रयोजनाय सहते
नादि सत्वशास्त्रेन्द्रियं चोक्तं ये वा तेस [illegible] साधवः तेषां सर्वकषा बाधकाः सूचकत्वात् सर्वकुलप्रकृतिषे
सुकयन्तीति वशिमुम् सर्वकषः खलवृत्तिर्वा [illegible] सुवने हिंसा प्राणवियोगानुकूल आपारानुकूलत्वाद्धिंसैव
ताडनादिवधानाहिंसैव तथाभूताश्च पुरुषाः हिंसीराश्च संग्रामप्रवीणाः सतां हिंसकाया [illegible] दपस्तेषां द
र्पोद्धरणाय [illegible] हरणे उत्पूर्वायं हरतिरुत्सादने वर्तते तादर्थ्ये चतुर्थी पुनः प्रयोजनांतरं वि
श्रीनष्टि धात्री पृथ्वी निःस्वाध्यायवषट्कारत्वात् [illegible] कपीडिता भारग्रस्ता देवैः तस्याः प्रतोषाय अवतारो
प्रायप्रादुर्भावं प्राप्तः यदा यदा हि धर्मस्य ग्लानिर्भवति भारत अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहमिति
शीतांशु तादर्थ्येपि चतुर्थी [illegible] पद्येव [illegible] श्रीं [illegible] प्रवीणः स्यादिति [illegible] हिंसीरो [illegible] सोऽशिति [illegible] सी
[illegible] हिंसीरत्न एकेमुख्या [illegible] उपसर्गद्योतकत्वं अनन्यसाधारणत्वं

राम
४

रामस्येता[illegible]वता म[illegible]ते रतिर्देवादिविषयाव्यभिचारी तथांजितइतिनारायणविषयापिरतिरव्यंग्यासर्वेत्रा
वसेया नलपक्षेएवासद्यनः सरकोनुरखाइतिविशेषः असन्तुनमः स्वभावेषु द्वयनेहिंसाय स्वस्यइतिवहुव्रीहिः इ
यदानगतिहिंसारक्षणदानेषु शोभसमानमत्रापिप्रतिपत्तव्यं गहेतिहस्तानमपितमः स्वभावं विविस्यप्रुद्ध्योडत्वेसतिति
रस्कारकत्वमभूदितिभावः एवंचपोनरुक्तेकुत्रापिनशंकनीयम् इयंद्रवज्रेद्रवज्रायोरेवात्रोपजातिकत्वम् उपजा
तिछंदोत्र ३ निजतनस्रडादिकएषसूप्पः पुरोधसावशिष्ठेनिरुक्तवर्मना शिखंडकोपर्य्यरमइयस्येस्व इय
संचरितंन्यशाम्यत् ४ निजेनेति एवःवयस्येसहपर्य्यरमत् एषरामः इतनलः वयसानुल्यावयस्याः तोवय
इत्यादिनानुल्यार्थेयत वयस्यःस्निग्धसवयाइत्यमरः तैःस्निग्धैः सहसहयोगं विनापीरुतहार्थेतृतीयाप्रतिपत्तव्या
इहोप्युनतिनिर्देशात् पर्य्यरमत् व्याङ्परिभ्योरमइतिरमेःपरस्मैपदंबोध्यं इतस्ततो भ्रमन्नासीत् किंभूतएषः सूप्पः
प्रशस्ताकारवान् रूपाद्दोपाइतप्रशंसयोरितियप सूप्पःप्रशस्तरूपेस्यादितिधरणिः पुनः कथं पुरोधसावशिष्ठेन सु
मतिनावाशास्त्रेनिरूपितंनयद्वर्मंमार्गः तेनैवनिहितं चूडादिकं कर्मयस्येतिवहुव्रीहिः शेषाद्विभाषेतिकप् चूडाका
र्य्यायथाकुलमितियाज्ञवल्क्यः विद्यारंभादयश्चादिशब्दोपादेयाः पुनर्कीदृ शिखंडकी काकपक्षः शिखंडकः अतइ
निठनावितिमत्वर्थीयइनिः पुनरेव अरुवत् स्वीयइवाचरत् अभवदित्यर्थः यएवददर्शसएवाहमतोस्मीतिमेनेइत्या
दौत् अपिच एवद्हृयस्यवरितंनशाम्यत् इयंहेतमार्गिसंतिनाशायंनीतिइयस्याः साधवः तेषुयोग्यं हृदयस्य वेदांत

रा·नै·टी

5

विषयावच्छिन्नचरितं मधुरासनं शुश्राव निशाम्यतीति श्रवणो घ्राणो जिघ्रतीति पिबतीति [illegible] कोशाः
निपूर्वकस्य शमेः श्रवणार्थकत्वम् योगवासिष्ठरामायणे वेदांतवर्त्माश्रवणं गुरूणां वशितिः संप्रति तत्रापि शु
मतिः कृतयुगेन लं प्रतिवर्षी यां चक्रे पुण्यश्लोकस्तेनाभूदिति ज्ञेयं यद्वा स्वः प्रमाणां सामैवांशस्य दयसाः प्रमाणो दय
सम् नवदयसाः अल्पदयसाः तत्र साधु अल्पदयसं कौमारे पौगंडयोरपि अवयस्ययोः स्वपितृचरितमेव श्रोतुका
म आसीत् कृतिविशेषोक्तिरलंकारः अभंगोपमासंसृष्टिः अद्भुतो रसः वयोरूपविभूतीनां मदकारणतामवगम
य्यैषां अनयोस्तु अपटुत्वं जातमिति भावः जगतीभेदेन सहोपजातिरियं पुरो वाजपेयिवत्र्यप एवासीत् कतिपु
रोधसोऽदुर्धर्षात्प्रेषिप्रवंति [illegible] देशसिद्धाः कुंदं धनायितं [illegible] निरूढेति विशेषणं ४ स [illegible]
न्नि समर्हणो गाधेर्ग्रन्थाने स्तोकाल्पपूर्वकालेनतन् सिद्धासदेवनदोभुवं वसति स्म प्रश्रवणानि शु
द्न् ५ सगाधीति सक्रोडक्षोणिपुपर्वतो तद्दर्शनमयागात् दाशरथेः पक्षे सरामः [illegible] सोऽपि तत्पु
वैराग्ये देवानां विप्राणामिति यावत् दर्शनं नयन विषयमगात् प्राप्तवान् विश्वामित्रेणापथिनीयमानस्तास्तां नदी
[illegible] नायपन् तत्र सिद्धाश्रमः यद्दर्शनं तुष्टे भर्तारं तद्दर्शनं कथंभूतः सः गाधिसूनुः [illegible] यज्ञविघात
शांतये दशरथं याचितवान् यदा तर्हि [illegible] संतापं हृत्वा विश्वामित्रमखं रावकैर्गमिष्यामीति ब्रुव
समभ्य [illegible] तनु कमानन एवेति रामायणकथानुसंधेया छि [illegible] सा [illegible] प्रश्रवणानि [illegible] वंदन [illegible]

राम

५

गाधिर्नामराजा तस्य पुत्रो विश्वामित्रं तं दवनं नत्वा तस्मिन् दहनात्मकस्य इति बहुव्रीहिः किं कुर्वन् सिद्धाश्रमं सरित्सरः प्रश्रवणा
दिभिः क्षेमार्गं नुदन् कुर्वन् इदं मुनिनामनेयात् । निकामं नेदर्शनं च देवनदीं भुवंम् आगान् राजर्षिः गीर्वाण चरितं गा गीरा आनंयनं
सत्कारं तं सम्यग् ज्ञात्वा तत् । यस्य वाग्यथा तत्त्व साम्प्रथा ज्ञानार्थी अनेविश्वामित्रिकरा ह्रादिन भवन्भूः सम्पदाहिताः ज्ञावेद्विष्टं वुद्धिः स्व
रितत् नलयक्षेत्र गाधी स्यादि गाधि प्रतिष्ठालिप्सया एतेषु च श्रोतादि कौशिकाति इति निर्वा वश्रो विचंकारं गाधिन स्तु गा
धिन श्च गाधिन श्चेहेतद् दनामैकशेषः प्रतिष्ठावं तं श्च लिप्समाना श्च स्त्रो केः म्रु वं तश्चते धाम नसापिहिता तथा सदि चारयन्
किंतु सम्यग् गर्हणां कुर्वन् पतितो निषधदेशं चरन् ततः मुनीनां पुण्यकालादिवा सिनां दर्शनमगात् दर्शनार्हत्वात् सिद्धा
नामाश्रमं कपिलादीनां सहितः सदाश्रि प्रश्रवणानि नुदन् पश्यन् देवनदी भुवं च मुनिभ्य स्तस्य मतं गिरा गीर्वाणा
नात् विशेषणानां तुल्यत्वम् अवसेयम् अमेयां उपेन्द्रवज्रेन्द्रवज्रयोः विपजाति संसार स्तोपम त्रपद्येविपरादेः ५
गीर्वाणासिंधोरुदयं च कौशिकाल्लिखाम्यविस्मेरमुखो वभूव नमाऽ कोस्य स्तुतिभाजनम् यानतो वलो द्विजाति प्रगायामि
केवलं द्वि गीर्वाणासिंधोरिति सर्वमनुवर्तते न च विस्मेरमुखो वभूव किं कृत्वा कौशिकात् विश्वामित्रात् गीर्वाण
सिंधोः उदयन्निशाम्य गिरस्तवकाणवेष्टां तेगीर्वाणा देवाः शापानुग्रहसमर्थत्वात् तेषां सिंधुर्नदी गंगा देशेन द्विशेषे
श्रो सिंधुर्नो सहिति स्त्रियां नस्मात् गिरिनिशम्य श्रुत्वा समर्थं ज्ञात्वा अभावाजानाये इत्यर्थं सामर्थ्यम् अद्भुतं दर्शितमिति वि
स्मेरमुखः ईषद्धसनशीलः स्मिङ् ईषद्धसने उपसर्गात् तदर्थानि विशिष्टानीति भाष्यम् विपूर्वोयमात्मश्चर्ये विश्वामित्रे
पिकौशिकौ लूकयोरपि कौशिक इति विश्वः । निर्पूर्वः श्रमिः श्रवणे स्वामः स्वस्तुति नाटकानां श्राजयान

प.मे.टी

६

6

इति नेति काकुः अपि तु अजातशत्रुणैवेत्यर्थः तत्र हेतुमाह केवलेति स्वकार्यमुद्दिश्य नो अजातशत्रुणा अपि तु द्विजातिप्रणया
य स्त्रीयानां गुरूणां च तिन्नाशोयस्य सात्वाद्याः गुरवो गतिरप्यंशः एक नंपनं गुतं गलितमिति कोपात् प्रमादात्
स्वाज्ञाताज्ञात्मनि संनिवेशात्मीयेव्योपदिष्टं यांश्चनेत्य ... नायीके नातुकां रक्षसीं अजातशत्रुणैव केवलं निश्चितं द्विजाती
नो प्रणयः प्रेम तस्मादेव नन्विहशंकयते अवधाज्ञा सत्यागाव ब्राह्मणस्त्री वधेन भाक् इति स्मृतिः अभिस्थापनायावत्तदि
स्त्रीवधकोत्तरोत्तम कुतो नादिति नहिशंकनंपरिहियते उत्सर्गापवादन्यायेनैव सर्वत्र शास्त्रस्थितिः उत्सर्गात् बलीयं
अपवादस्तु विप्रस्तु स्त्रीयं अत्र पुरुष भीमगर्भिणी सेतुभेदकरी वास्तु शिलावध्यापयेत् योनौ ... कोदंयस
गतं स्यात् तस्माद् द्विप्रादि स्त्रीजिहं नवधेति निर्णयः शास्त्रे अत एव द्विजातिप्रणयायेति धनकं पदं प्रक्षिप्तं अन्यथा कुल
कारसनानकार्यात् कुलाकिंके: विश्वामित्रकृतादयं वधकारिणीं ताडकां श्रुत्वा रामस्तामीदिति भावः तादकापक्षेपि सप्तका
त्विपादित्वं न वधोद्धृमस्य रूढपक्षे द्विजोपगम ... पतिधानेति विद्वयादिवत् न लघपक्षेतु द्वयोर्द्वे ... कार
समस्त कोशाज्ञात्वमते सकाशात् कोपापदं वोपलक्षणं नहि आकरणविना कोपाज्ञानुशंकते नहि ... विनाबोध्याकर
णा आख्यायते नहि भाष्यपारीणः शास्त्रान्तरानभिज्ञो भवति इति समस्तविधाज्ञो वा व्याकरणात् ... ते कारणमाहालंको
रोयजाते अपि च समस्तः अस्तः अस्मानन्ताभीयात् द्विरस्तस्यानिनावयतीति अस्तः तत्पक्षये हैवादिकः क्षिप् अथानौरि
ति नवधिधानादीर्घः विरोधेन सत्समासः आधायान्त विरोधं मतिभाष्यात् ननातुकांस्य श्रुतिं नो अजातशत्रुणा कस्मै प्रयोजनाय के
वलं द्विजातिप्रणयाय नतः प्रणताः साधवः प्रत्यवदेहिनां पावकं शंनमितिभागवते ... तानन्दंति यांतीति नताः वे

नुसारिणः अरपटगोतो पद्माद्यन् ननाशनोऽनानंदो यस्मात्तां सुरवशीर्षजलेवु कमितिविग्रहः सहशीख्युतिः निरंतरं सुखशीव
र्धितां तां श्रुतिं नोदरी च कारेत्यर्थः अहतोर्वा रत्नार्थिकत्वमत्र ... कोशाध्यक्ष वैमनस्यप्रतिपादितः स्यूर्णा वर्धरो धानुकूलव्यापार
वसा कदाचिन्नासीदिति भावः अलिह्यालोचने सर्वथानुभवन्न बधसामित्यर्थः हिजानीमादिपदेनादर्थे चतुर्थी अदोषकालो इति आ
दिकाहततामसादिसंप्रदानं कदाचिन्नस्याने वासीदिति संजयितुं केवल हि जानिपदद्वयसंदर्भमानम वसीयतां पद्धितेः निरीलिकेवलमिति
त्रिलिंगत्वेकस्यत्वयोहितिना... ... सप्तमत्ताम अगमास होपजातित्वं ६ सुबाहुकुमारीच हतंपदं ययोः सर्वोदरक्षीः समद्रो
घरत्व दुतिरवगे सव्यपनेतुमिच्छु नुधानमेवाश्रयदागनार्तिः ७ सुबाहुमिति आगनार्तिः सुबाहुमारीच हतंपदं ययो आ
गतं आगनासम्हतः तस्मसमहदनरा तस्मद्वीसमहस्य पद्धतिं दृष्ट्वा कामवाधा प्रतिश्राम मासीत् आगन्यस्यानि दिस्मात् पंचम्य
र्थं बहुव्रीहिः दृष्टवः दृष्टशो भगवान्सः सुबाहुश्च मारीचश्च तामांहतंपदंस्थानं ओराप्त्युरय यो गुरवे कार्यसंपन्नत यद्गतिपरिभाषया
रत्नसाराजानो होगहीतो उपलक्षणात्व मन्येवामतः राक्षसहतंपदं स्थानं ययो अगाम किंचिकीर्षुः सः मंत्री विश्वामित्र यज्ञो रक्षीः
रक्षितुमिच्छुः सर्वेतानिपूर्वोक्तपथाधाइनिदीर्धत्वं सवमाच्छादनेयज्ञे सदयानेधनेपि चेतिअगारः चमारीचादीनां रवगे दुतिं समनी व
रतन सम्पृक्तवगे वेदयापारः किंचेतिअव्यात करोमर्थशावकत्वात् किंचिकीर्षन् आश्रमात् अपनेतुमिच्छन् यज्ञार्थं शीघ्रप्रापदो
अपसूर्वोदूरीकरणार्थः महर्षिसर्षानुवृत्तमन्नेवेतिभावः सानुधानं निःशरणो वनभेदप्रयोजने ... कांडे तेषो मुनीनां
यज्ञविघ्नविधानप्रयोजनमेवाश्रयत सेवितकान् पंचित्रा एण घसा ... नाभिमादि ... प्रतिपादितत्वात् अथ नलपक्षे व्याख्या
नम् सुबाहुमारीच रवगेर्हतं पदं ययो तादृशान्नसुबाहुर्नामस्तीरहासीत् तमेव करदयां चकारमर्दयितो वहुधा अथवा शो
भनावाहवोदोर्दंडाये षांते क्षत्रियकुंजराम्त सामपिधातकानाहि हिजये सुबाहुमारी सुप्रजातो शोनिनिसानकी लेसुबाहुमारी

रा.नै.टी
७

स्थाने ह्रस्वे [illegible] तं पदं तस्य गस्थानं येषां किं भूतं पदं उद्यानमेव ननु एव धारणां किमर्थं अनंगदाहस्य यथा [illegible] येन हृत्पदस्थानं सोऽचि-
रात् कथं भूतः सः आगतानाशि: आगतो [illegible] जाति: पीडा यस्य स द्युतिवद् [illegible] तस्येदमित्य [illegible] [illegible] क्षिप्रा: पुंडरीक इति
कस्य: [illegible] तं पुन: कीदृशः सर्वं [illegible] सदादाने [illegible] कदाचिद [illegible] विधानके [illegible] मनाभूत् [illegible]
[illegible] आश्रयदेव [illegible] स्यादि: [illegible] कामजं [illegible] [illegible] [illegible] संनिवेश
नैव [illegible] समजीघटत् आत्मानमिति शेष: [illegible] रूपं संगमितवान् इत्यर्थ: [illegible]
मयमात्र [illegible] नानाम्नाति [illegible] करोत् अथानेकारे [illegible] परिकमले कारः [illegible] वर्तते संस्कृत [illegible]
[illegible] संपरितो [illegible] धं ७ मारीच माद्रुद्रुवदुग्रतेजा एकं परे [illegible]
ना जग्राह [illegible] पदवीं क्षुधार्दितां निरीक्षन्देहो दधितार्तिजोषः ८ मारीचमिति [illegible] अनुवर्तते [illegible]
[illegible] सः मारीच माद्रुद्रुवत् द्रावयामास रामेणेति शेषः द्रुद्रुगतौ [illegible] रूपं [illegible] उग्रतेजा उ-
ग्रं तेजो यस्य सः एकम [illegible] अदुद्रुवत् [illegible] नमारितवान् [illegible] शिलीनेद्रुतंद्रुतो [illegible]
[illegible] दर्शनात् [illegible] साधारणे समाने [illegible] ना
शः पलायने [illegible] दर्शने [illegible] सर्वे लक्षणे नैव हता: [illegible] निचीन
दे [illegible] दधितार्तिजोषः क्षुधार्दितां [illegible] पदवीं जग्राह [illegible] निरीक्षितो देहो यस्य सः तथा [illegible] अनुद्रुतए
वेति [illegible] विभाषा [illegible] शिया [illegible] स्वार्थे [illegible] प्रत्ययः [illegible] [illegible]

वि

राम

पि

तद्रतिकर्म तथया यदा यदा हि धर्मस्येति स्मृतेः भक्तानुग्रहार्थम् अवतारान्करोतीति भाव तेनाम्भालेन रसेनेति ता
न् हासीर्हंसः सूर्य भानुर्हं सूतिको भात हंसस्येयं श्रुतिप्रकाशरूपस्यापदवी तां जग्राह तमो रूपराक्षसपादकल्लात्
पदवी स्पतिरित्यमरः कथंभूतां पदवीं बुधैः पंडितैरर्दितां प्रार्थितां अर्ह गतौ याचनेच चौरादिको धातुः बुधहृतौ पंडिपी
तिसामान्यं को हरिणं प्राप्तस्तिदेवो उंछ कर्तृशिशिविर्बलिः आधः कपोतोव स्तवो सर्वशुवेणशुवंगताइतिभागवते परोपका
रस्यातिदर्शनात् स्वयं सुखमप्रस्तान्मल दर्शनं सुखादेतिधर्मते अनलपक्षे माख्या लक्ष्मणेन लक्ष्मीवान्सः एकं मारीचं मा
रुतवत् तेषां रक्षसां मध्ये रतिप्रकरणमेव योधेद्भुति लक्ष्मणो वाधिकारस्य मरीचिभिर्मायामारीचं योधिकोरण् वाहु
र्थसुवर्णमणिकान्तिशाजिष्णुसुवर्णमरालप्रधानत्वात् अन्यथा विष किंभूतः उग्रतेजा परेतुनेषुः पलायंतेतिभावः अथो
पलायनानन्तरं निचीनदेहः निचीनो वामनीभूतो देहो यस्य सः कपटेन अहाय्य प्रतिदुकानिश्चिप्य दयितार्तिज्ञोषः दम
यंतीतोयार्तिसज्ञोषः अपार कामवाधा यस्य देहः कश्च नान्योयं सहायं कुर्यादिति समालोच्य हंसानां हंसस्य प्रधानस्य वा
तस्यैव पदवीं सरणिं जग्राह मार्गरोधाद्भुल्लेन जग्राह सर्वथः ब्रह्मप्रेरितः सोपि जगर्हे अन्यथा कथं गृहीत कथंभूतां पदवीं
बुधादितां पंडितैरर्दितां वाधितां विहंगमनिग्रहस्य सानूनामनर्हितत्वात् अर्दहिंसायां चौरादिको धातुर्बोद्धव्यः अत्रत्व्ये
द्वयोरपि तुल्यं रूपं तदेवरूढः ८ वैदेहमाश्रित्य पतिंवरोद्भय तायकेलंप्रभुमानयन्नम् निमन्त्रितं धीरवरस्य दानीं
विवाह वेता जनकास्य देतत् ९ वैदेहमिति रामपक्षे धीरवरः पंडितश्रेष्ठो विश्वामित्रः तं प्रभुं तत्र जनकास्पदं आ
नयत् प्रसिद्धार्थस्य कुतः कायप्रकाशो आख्यातः तत्प्रसिद्धं जनकास्पदं मिथिलापुरमानयत् प्रापयामास

रा॰नै॰टी॰
८
४

किंकृत्वा पतिंवरोढ्वं यज्ञार्थकेतं वैदेहं आश्रित्य पतिंवरा स्वयंवरा सीता तस्याः सकाशात् उग्रा अधिकशोभायस्य
सः साक्षाल्लक्ष्मीः पृथिवीतः प्रादुर्भूता यस्य यज्ञवाटे इति प्रसिद्धाधिक्यं तदनुष्ठितस्यासीत् पतिंवरा च वर्या चेमम [illegible]ः तदा
नीमेव कौशिकनिमंत्रणार्थं जनकेनागतं यज्ञार्थ यंयज्ञार्थः तादृशः केतो निमंत्रणं यस्य सः केन आचतो निमंत्रणोद्व योरा
दिकोधातुः केतनं केतो ध्यानवेषश्च तं वैदेहं [illegible] विदेहानां देशानां राजा वैदेहो जनकः विदेहस्य अपत्यं पुमान् इति वा
वैदेहः आश्रित्य प्रजया योग्यया संसेव्येत्यर्थः श्रिञ् सेवायां धातुः आभवतीति निष्ठुते अतः पूर्वकाले क्त्वाल्यप् कथं प्रभुं रामं नि
मंत्रितं नितरामर्थं पुमेव विना [illegible] इति बहुव्रीहिः [illegible] इत्यत्वे कथंभूतो धीश्वरः विवाहे वेतीयस्य सः रामलक्ष्म
णौ वैवाहो जनकपुत्र्यौ [illegible] इति अथ नलपक्षे वर्णनम् धीश्वरः तं प्रभुं वैदेहं यज्ञार्थकेतं आनयत्
[illegible] पंडितं मंदयोरिति धरणिः तं प्रभुश्रेष्ठो नेषध कार्यप्रभुं समर्थं कार्य [illegible] यथा [illegible] यमालि
[illegible] तथा श्रावसेयं क्रियाकारकसंबंधस्यानिमसंयुक्तत्वात् श्रीनां पक्षिणां देहाः विदेहाः विदेहानां हंसानामीशो वैदेहः तस्मि
दक्षिमरण [illegible] इति वाक्य [illegible] इति [illegible] तेहंसराजे यज्ञार्थः पंचम [illegible] स्थानविशेष [illegible]
[illegible] केतस्थानं कृतनिवासे [illegible] आदेशात् तत्रोपाभिरूपे निवासे स्वार्थे [illegible] आसीत् अतः सप्त कथंभू
तेतं पतिंवरोढ्वं पतिंवरा स्वयंवरा दमयंती तस्याः उग्रा [illegible] प्रकाशो यस्मात् [illegible] पूर्वादिमपंचपात्र तदर्थ
महोदधे [illegible] प्रकाशो हंसादेव नलस्य समजनि [illegible] कथं निमंत्रितं नितरां मंत्रितागुणपरिभाषणं यस्य सः
[illegible] मंत्रिगुणपरिभाषणोधातुः किं कृत्वा दूरवदाश्रित्य पूर्वं ग्रह [illegible]
[illegible] कथंभूतं यज्ञार्थकेतं तत्रसिद्धं जनकाख्यदेपितुःस्थाने [illegible] ने वपित्रा पूर्वं पाठ दोमादिपंचय

राम
८

ज्ञार्थं तत्र रचितमित्यर्थो ऽन्वयः इंद्रवज्रोपेंद्रयोरुपजातिश्छंदः ॥ श्रीब्रह्मसभालादद्भुतादेवान्महिम्नः ...स्मादिति वै
तेयस्य सहितिगूढो ऽन्वयः इदं नलविशेषणं यो ऽयं ॥ ९ ॥ सतर्केवामास्पदमिद्धतेजाः प्रगुणानलस्तां तनुमाचचार परिच्छदस्य
प्रगुणोनलो योधाचंयमस्या स्परा भिसारी ॥ १० ॥ सतर्केति रामपक्षे इद्धतेजाः अस्य वाचंयमस्य परिच्छदस्य हूतां तनुमाचचा
र इद्धदीप्तं तेजो यस्य स इद्धतेजाः तादृशो रामः वाचंयमप्रभुरंदरो वेति स्वयोगानिपातितो मुनिर्वाचकोयम् तपस्वी तापसः ॥
री कौशी वाचंयमोमुनिरित्यमरः परिच्छदः परीवारस्तिरस्कारः पाषाणाभूतास्य मुनिश्रापेन पवित्रीतनुममलमंशं आचर
ति स्म तर्वे अनुतिष्ठमाचरतीतिमल ... प्रागल्भ्यकारकत्वात् आमाराादिषोडशपदार्थनिरूपकत्वात् तस्य नामीऽरू
ला न तदास्पदम् पाषाणी यस्या नामीति ता सर्थीपः नमदमधिष्ठाय वरमारजः ...तिप्रतिवक्ष्यते देवविषयरतिः कवेर्मंग्या
त्रममकाव्यलक्ष्यांक... कथंभूतो रामः प्रगुणा सुरालाभाय अजावजिस्तप्रगुणा इत्यमरः पुनः कथं० अनलः
सः अलंभूष्णपर्थ्योप्तिवाय्योस्य अलंनीतिअलं नाले समर्थो प्रभात मरूणानुग्रहातिसमर्थ इतियावत् पुनः कथं० प
राभिसारी परोमुख्य हा... अभिसमंतात्सरतीतिसभिसारी दूरानांत्रमा परा इतित्रिकांडी नलपक्षेतु इद्धतेजाः स
तर्कवामास्पदंश्रयाय हूतां तनुमाचचार इद्धतेजो विशेषणत्वात् यस्मात्... सोवर्णानुत्वात् विरोधिया
नत्वात् तथाहस्तः पदुदीतिस्तुयादो दृढके तर्कभाषाचार्थः सन् तर्कोभाषासंस्तुतरूपायेषां तेषां ... विप्राः वा
योवल्गुप्रतीपोहाविश्रमरः विपरीतेस्तु दरे च वामो वामानुयोवितिति इति ...: तेषामास्पदस्थाने यज्ञमंदिरं गत्वा पु
तांपवित्रां तनुमाचचार अकार्षीत् होमधूमविच्छदर्थोनाधिना तनोः पवित्रत्वे शालायां सर्वेषां भवतियतः योनलः पप

रा.मे.टी

भिसारी। अस्य वाचंयमस्य परिरक्षितस्य वृद्धिपरिकल्पितस्य प्रभग्रस्य सोऽयं राजहंस कलानुइलामास्य चारेऽस्त्वन्वयः श्रवृत्ति
त्तगुणायेनमः प्रादिभ्यो धातुजस्येति वार्तिकवचने बहुव्रीहि वैष: वाचंयमो भक्तिस्येति श्रव्य हृदुत्वात्त्रोपहर्षद्विनुद
श्रयेत वाचंयमभक्तस्यास्यनेनलस्येत्यन्वयः निरवद्यमयं देशे सेवोपस्तसनीयः स्यात् इत्यादि चिंसरस्मभेदभियावि वि के
मंत्रमकार्षीत् तत्रे वपत्रभाल्लायंगला प्रे भ्यान् ॥ विदेहराजः पुरमध्यगात्य दशाधिकः सर्वसमस्तमेधः हिर
रामयीं स्वाविविधविचित्रितां तां ननंद निःशेषपतद्धिहाराम् ॥१॥ विदेहराजइति एषविदेहराजकं पुरमध्यास्य ननं
द विदेहानां हंसानां राजा अष्टद समुद्रंशगारमगात् आगारेन गोपुरमिश्रग्ना अत्रागारस्तन्मु अंगत्वा अच्छगमे समार्थः
ननंद ननंद कथंभूतः सः दशाधिकः सर्वसमस्तमेधोऽग्रस्य विविधविचारमालापिताविशिष्ट अगृजितवान् दशाधिपत्ये
वर्तुथ्यथेव बहुव्रीहि कथंभूतं पुरं हिरण्मयीं सुवर्णमयीं इत्येतेनाकारादि भिदिविचित्रितां पुनः कथं० निःशेषपतद्धिहाराम् निः
शेषा समकलायेपत्रिराले वाव समांघसंसातां पुष्पहारस्य स्त्रीलिंगत्वात् एः पादोयंडुघः द्वितीयार्थे तस्य रूपं श्रूयगादेन्चनगरेद्
विदेह: अक्षमश्रीरामपदे एषविदेहराज पुरमध्यगात्य ननंद जनकराज विदेहानां राजा विदेहराट् तस्य तस्य पुरं मिथिलाख्यं अहं
गत्वांश्रुत्वंगत्वा ननंद कथं० सर्वसमस्तंदशाधिकः श्रेष्ठाद्दिगायेतिकयममासांतः मुख्येषु नाविशिष्टं सर्वसमस्तः कथं० पुरं हिर
रामयीं स्वर्णप्रचुराम् पुनः कथं० नेमा भित्तिभिर्विचित्रिताम् विस्मयावाधिनीं पुनः कथं० निःशेषपतद्धिहारां संपूर्णाःपतंतः
पक्षिणः अपकादयस्तेषां स्त्रीनां समन्ताविहारः क्रीडायस्यास्ता यद्वा अविद्यायांपकारकस्यतत्त्वज्ञानंज्ञानोपदेशरूपमातेदृशकाशद्वारा
तेषांप्रजानंदार्थमायस्यांसा मोक्षधर्माद्योजनकमहाराजहंसस्यतामहाय तनस्य भावमेत्रोपमित्युक्तात् उपजातिवृत्तः ॥१॥

रम
८

विनावभासेकुरु कं सतोतिंतपक्लिनाको गिरितिर्विनीतेः [illegible] समग्र [illegible] रामाय तोषं खलु [illegible]

म [illegible] विनोदभा [illegible] तपक्लिनासौ ते कुरु कं विना विनीतः क्षोणिपति वभाषे [illegible]

र्तः समंतत प्रतीते कुरुकोन [illegible] कुरु [illegible] नपः [illegible] भिप्रेता [illegible] निः नपः श

यादिनिग्रहः तमोम [illegible] विनीते [illegible] विनीतो [illegible] क्षोणिपतिन [illegible] वभाषे

उक्तः किंभिति हे राजन् [illegible] कोदंडे [illegible] परिदर्शयन् [illegible] पंचमार्ध [illegible] खलु नि

श्चयेन लपसे [illegible] संशयो नास्ति खलु [illegible] येन [illegible] राजानः [illegible]

नीताः राम [illegible] नुसारे [illegible] समर्थत्वात् नव [illegible] प्रमाणं [illegible] नामः [illegible] रूपर

विनापरम [illegible] निपदं [illegible] विनीतः सगं ते [illegible] पि

डनं [illegible] तेन [illegible] संलापरहितेन विनापक्षेरा

हंसेन संताप [illegible] कुरु कं विना [illegible] विनीतः क्षोणिपतिने लो वभाषे कथितः किंभिति [illegible]

[illegible] भवतीपरः [illegible] इति [illegible] सात स्वय

मेव सन्निधत्ते [illegible] खलु रामायाश्रयः [illegible] भगवतो [illegible] धानुः घन

कविघातं [illegible] पीडाकरः कोसि [illegible] दमयंतीत्वमतीव [illegible] भावि [illegible] उपजा

तिरु [illegible] विनीतः क्षोणिपतिर्नलो वभाषे इति [illegible] १२ [illegible] मोदमेधि कोपेन पू

र्णेन नवाहनेन यथेमके [illegible] तपान्निना पुराप्यति [illegible] १३ [illegible]

[illegible] वर्तमान [illegible] कोपे

ननेषि नश्राप्नोषि तथा वादनेन नेषि यथा गुराकान्भवन्नवान् ध्वनिपातिनाद्रुमकेन पुरा हर्षं प्रयाति प्रयास्यति स्फीतेनव
रुना रुद्रा देधान मोदश्रीतस्य कोमोर्ध्वसन्नः सर्वस्या हाः हनं पानं मितमितामकोशः गुरााधाद्धात्मशं साधां मनुष्प भवन्तितिभ्य॰
धातोः शतृ प्रत्ययः भवान्पुष्पापेयुश्च द्वं द्वीर्घवृसीयते ध्वनिपातोति निः इति सार्द्धयोग्ययरा क्रमकेत्रेमर्थः ध्वनिशब्दः कु
श्रीध्वनितारद्योतकः द्रुमकेन कुमारेणाप्यनुनेसर्पः इत्येवमर्थेन वन्तुरायेनाम्नः प्रयाति प्रयास्यति द्रुहेतासनेभविष्यतिकाले
धनुर्भंगानंतरमितिध्वनितम् यावत्पुरा निपातयोर्लट् भविष्यदर्थे लट् बोध्यः अथनलपदेकारकानं दर्शयति यत्र दोनिस सं
वंधात्येति आक्षिप्यते हेराजन् हे गुरावान् सत्यशीलेदयाक्षमाजेवादिगुणायुक्त भवान् त्वं यथा द्रुमकेन पुरः स्थितेन हसेन ध्व
निपातिनाद्रुमवादत्वात श्राकारेणविशिष्टमेपिश्रविलमुड्डीयमानेनर्क्षीतेननकोशननवाहनेननेदिष्यसि पातदुधनपातेनि
पातश्चादिनाशयोरितिहेमः ध्वनिपाशेतिपापतयोतकः नातिस जनवकार्थमहेकलो शिष्टपूजगतोरूपज्ञातिः द्रुत्यं किलान्या
सर्पपिश्रिश्रतासुष्टुनिजातिष्ठिदमेवनामेभिवचनधामप्रपात धनिकाश्रमुत्तमं दर्शितं १३ इदिरितोसाविनितेनपाँतोवि
स्तरवानेषपरं विलोक्य स्तगश्रहाभ्याहरवांवि चिकीर्षुः योस्मेत्तरा वक्त उपाजहार १४ उदीरितइति रामपक्षेवर्णनं तेनो
दीरितः शांतो ज्ञानकत्वतसे यो हर्षं विस्तरवान् किं सत्वा स्वापदं विलोक्य येशं मा देष्यन्तु यन्तुः तत्परं रामं विलोक्य किं चिकीर्षुः स्व
गश्र हाभ्या हरवांविकीर्षुः स्वगात्यायाण्य द्वातीतिस्वगयद्वे यन्तुः तेषांश्च हो ग्रहरोसेति तस्माभ्या हरवांसभायां तदेसमक्षं यदानय
तं तं भृत्वौ रसकं युभितु अथ त्वशादतेसोन्नहुन्मनुरुपाजहार सहसा विदास त्रिशाया: पुरुषाः श्रीप्रमहत्ता लक्ष्मीरतिकरमालिनपुरि
त्यर्थः पुंसासम्पू हत्वंतयंत्र यत्प्रत्ययः स्त्रीपुंसा भार्या नत्सत्मने भवनाः इति सत्रे रोतजितरासंश्चमेयद्वादेः शिवा दहु श्वरुंत शिवामे
व इवाः शंकुरः तस्येदं स्त्रेयं तत्परं यस्यसः इति बहुव्रीहिः द्रुमकेनेति सर्वंवयाद्यनुवर्तते द्रुमकं रामीमितपदः अर्थवशाद्विभाते परिणा
मदुर्त्यं भाग्य जागहत्क्षम अनाप्यकर्म सत्राक कारकस्येति अनादेशाभावः विश्वामित्रमिश्रो यशोविद्विसितेतेने त्सा तमेशपरं

विलोकयतिस्म दृष्टमेव । अथ नलपक्षे आगमोन्मादः तेन दक्षिणाशांतो नूतो सौ इति अगस्त्यो नो दीक्षितः । [illegible] विसृष्टवान् विस

सर्जे किंकृत्वा इन्द्राग्निद्वादीनामपीशोप्रहृता स्वदादीनां [illegible] स्वपरामर्शक [illegible] दमित्यादिना [illegible] दमित्यत्र [illegible] प्रति

पादनं बोध्यं सपत्नतमो यस्य समष्टुरिति बहुव्रीहिः । दूराना [illegible] परा [illegible] विरश्चिराक्षो [illegible] मानि [illegible] स्यादिति शंकमा

नः विलोकि विचारे दृष्टवान् । य [illegible] पिमालापांपूजित एवास्य [illegible] पक्षीन [illegible] पथि [illegible] पितो [illegible] दिति [illegible] विसृष्टवानि

तिपदेन मज्यते किं चिकीर्षुः खगग्रहाभ्यां हस्तं चिकीर्षुः खगग्रहो हंसग्रहः तस्मादा [illegible] देवाद्रीः तस्मा [illegible] हस्तं [illegible] सी का

रः आसमंतादङ्गीकारः हस्तं आप [illegible] स्वीकारस्तेयं नायनं चेति दाक्षिण्यात् कौमुधां आचरतु । अकारो वासुदेवः स्यादित्ये [illegible]

अहिंसा सत्यमस्तेयमिति धर्मलक्षणं न हिंस्यात्सर्वभूतानि इति श्रुतिः ताडनादिवधं मा हिंसा [illegible] इति विचार्य [illegible] मर्थः स्वावि

कानामिदं [illegible] तमिति भावः । त्वरावतां [illegible] तदुपजहार अनहंस्या [illegible] देशं पुरुषसम्मत [illegible] त्वरावान् न [illegible] सने विसर्जयत पक्षि

णामुत्येवं [illegible] पाजहार अधिकमामंतादंगीकरणे इति भावः । उपोधिके चेति [illegible] कादुपथा [illegible] दीर्घ इति [illegible] सिद्धं ततश्च सर्वविसर्जि

तादृत्यर्थः २८ शरासने वेगवयोन्न [illegible] रामो भनक्तिजनकात्मजाप्रदः विविक्षि [illegible] भूपसभं परा [illegible] वीक्षास्यमत्रीवतरत्वमेद ॥

शरासनमिति रामपक्षे रामो वेगवदेन [illegible] शरासनं ससुरु [illegible] अभनक् कथंभूतो रामः जनकात्मजाप्रदः भूपसभं [illegible] परा [illegible] वीक्ष

विविक्षिये [illegible] तत्त्वमेद इसन्वयः रामो दाशरथि वेगवयोनज [illegible] शरासने [illegible] अभनक् बभंज कथं जन

कात्मजाप्रदः [illegible] दः तेषां [illegible] वीक्ष्य [illegible] विप्र [illegible] सने [illegible] नगर्वस्यादिति [illegible] अस्य वासुदेव

समत्रीवतरत्वमेद [illegible] लुप्तिकरणा [illegible] रूपं साक्षात् [illegible] वतीर्णोत्र ऐश्वर्यं [illegible] समर्थो [illegible]

विनेतिभावः । नलपक्षे रामो नलः वेगवयो [illegible] समरः अतिसुंदररूपत्वात् नलस्य [illegible] शा

रा॰ नै॰ टी॰
१२

मारते वर्णितत्वां चारुवाचीं सर्वे जरामशब्दः कोशग्रामाया पात् पूर्वं वेगवशेन तं हंसं दृष्ट्वा आक्षय रागवेगात् शराशनं श्रीहंसा
यां अदोषपूरकः शरः गुरुरिति रूपाणि शरो वधः अस्तगा लिदीप्त्या दानेषु आदानं ग्रहणं यथाय ग्रहणं ताडनादि वधं तायाम् हिंसेव
प्रकीर्तिता इति मेदिनी निग्रहाय ग्रहणाय भनक्रमर्दयामास दूरीव कोत्सर्पः जातकारुण्यः परनिग्रहो पहिंसारूपमेव विचार्यं दूरीच
कार तदित्यर्थः अथ जनकाद्भुतप्रदर्शिणि निषिद्धिमिये जनानां काद्भुते आनंदाश्चर्यप्रददानीति जनकाद्भुतश्वेदो हंसः प्रकरणात् एष एव
आश्चर्यं हतवान् सुरवणीषि जलेषु कश्चिति [illegible] असमभूप सभं पराक्रमं दृष्टावीक्ष्य अपिच मत्तावतरत्वेमानुषावगारे [illegible] हरिभिर्वासि
हेह ईदृक्तौलक्ष्य वर्णयामास अवतरणो भावोवतरत्वं शाद्वंताद्भावे त्वप्रत्ययः इंद्रवज्रोपेंद्रवज्रयोरेवोपजातिः १५ अभिरमयों दम
यंतपूर्वेला स्वयाय भाजः प्रथिते स्मीता सारा जवक्रोचित संगभीतान्नलेन राजीववनीयथेव १६ अभिरमयेति रामपक्षे अपूर्व
सौंदर्यं पूर्णाश्रीसमूहान् दमयंती कांतान्तिरस्कुर्वती या सीता प्रथिता सि राजवर्यं श्रामा अदितसंगभीतानात्राप्नोलेव केनकाद्भुवनलेनरा
जीववनीव राजासौ येनदिशी ग्रिपद्गुति कोशः राजवत् वक्र यस्मात् सा वंद्रानने नितिफलितार्थः दमुद्रपशमे हेतुमण्यंतः तां च रामराजमरमीय
कमितिय दृशा विशाखस्तनराजीवपुष्करांभोरुहाणि च शतादिरिति शतादिरानंदसुपुष्पेत्तरा जः हंसकुलैरमान्यः कथंभूतस्य
कमितिय दृशा विशाखस्तनराजीवपुष्करांभोरुहाणि च शतादिरिति शतादिरानंदसुपुष्पेत्तरा जः हंसकुलैरमान्यः कथंभूतस्य
नः चक्रेशाणाकेशयुतस्य तस्य संबंधिकार्यव्यवसायस्याप अभिज्ञात अवद्य आदेयस्य सः उत्तरपदेस्मानं दशदोषस्य सदृत्यर्थाद् नानंदो गोतमपुत्रो
नः पुरोहितो वैजल्यो यांगवश्रुतीषु किंभूतः हंसकुलैः असमान्यः हंसो मरालेरा ले सूर्ये च स्थात् सम्भेदे पिकीर्तितः इति [illegible] कुलं गोत्रे च संघा
ते कुले जनपदे गृहे इति मेदिनी हंसः सूर्यः कुलं ये षां ते हंसकुलाः सूर्यवंश्याः तैर्नमान्यो यस्मात् अथवा अनभागवद्वसुदेवेनापि मान्यः
मानपूजायां चक्रं चानीकमश्वियामिति कोशः कार्याये मवसाया उद्यमाले वा सायो तः कार्ये सुनिश्चितार्थे इत्यर्थः सर्वथास्या यस्य कर्तव्य
त्वात् अतः स्वरूपेनिकटेनाशनि यकवचने व्याभिविद्युपश्च वोपस जनकमेधोमस्यानं धनुर्भंगानंतं संविभ्रमेतो निर्णीतः ससेवामरा
शतादिरानंदसुपेत्तरुणोशराजः कुलं हंसकुलैरमान्यः चक्रे [illegible] तस्य संबंधिकार्यव्यवसायस्याप: ११

राम
१२

श्वयपोरपीति तेन: घोतकर्म्मीरिति उद्यमे व्यवसायः स्यान्निश्चयेपि च पुंस्यपमितिरिति देवः अथ नलपक्षे या दृश्या दृहसीना दुःकामः एतेषु दृढ
सः सोस्यासीति दृहसीनामीता मनसा प्रपन्ना अतिकंदर्पभवन्मूर्तिपत्नी त्वमेव मनसा प्रागेव प्राप्ता वीगतीत्यत्राकारोपि पिधातव्यं तं प्रश्लिष्य तद्
निदीक्षिता कौमुद्या माकुः सर्वसंमतत्वात् ततो निश्चयामीनदिति रूपम् पप् अभिख्यया नाम्ना अभिरव्या नामथो भये तत्पक्षे यादमयती राज
वक्त्रा सो चिलसंगभीतात् कथंभूता अपूर्वलावण्यभाजः अपूर्वंसौ दृश्यमाजोनादिरांगमध्ये यतः अनिद्रतामिति निद्रारसोद्यती एकत्वेच
निद्राणांभवतिजातिः यदा येदृशिसौ कारात् मिदचोमात्मप्रवृत्ति सूत्रे ज्ञातृत्वाभावसापकोमधोयं ग्रथिता चिरव्या तास्मि अतिर्भवतीपरदृतिमा
ध्यम् संद्रा ननासम्भवसमीभवतु योग्यत्वात् मालगंधे काकेनेव नलोनालमथात्रियं कमलवती नलेन यथा त्वमपि नलनामासि कमह
वनीस्थानीयासा तथैव योग्यासीति भावः ननु तत्र दूतो घटकः कः स्यादित्याशंक्याह १६ हंसकुले रमान्यः शतादिरानंदः सोयं तत्रांभीमस्यपुरउ
पेतु महाक्षणाः पुरःस्फुरत्सक्षी विशेषप्रसिद्धदोषेण शतपदमनेकसंख्यामवगाहते देवशतेष्वपि श्रेष्ठः आदिशब्दः श्रेष्ठवाची प्रथममध्यात्रेस
त्वात् आनंदयतीतिरूपेणवाचास्त्यर्थो निपानंदः नंदयतेः पचाद्यच् हंसकुले नैकप्रहसपानमराले: नमानोयस्मादिति पंचम्यर्थे बहुव्रीहिः उपेन्द्र

हस

गच्छतु कथंभूतस्यतस्यराज्ञः दूतेनेवलेन दूतेनानुल्यस्य अंडुनेषधस्य अयं स्वकार्यव्यवसायसायरव आत्मनएवकार्यायोगनिश्च
योपक्षीतिभावः मदेकसाध्यंतत्त्वापराणामितिधन्यने युञ्जम् द्योतकर्मणि भावे घञ् आतोयुक्कोध:प्रागेवाभिहितः तदेवहन्नम् मांद्र
शीघ्रंत्वमाज्ञापय पांडुत्वादिकामबाधांजहिहित्येवं हंसेनधन्यने १७ सराजहंसो वचनं महार्थं निगद्य मौनं जुजुषेभिरामम् आराममू

वचने

विशेषकं

नःप्रसन्नसादरामो मध्येसभंसज्जनवंदनीयः १८ सराजहंसस्तुति रामपक्षे सराजहंसोजनकोनाम अभिरामं महार्थं निगद्य मौनं जुजुषे
सुरकुलरपदेत्यादिवाक्यात्कोशस्पष्टहंसश्रेष्ठवाचकत्वंज्ञेयम् राज्ञां मध्ये हंसमिवेतित्युपमितं व्याघ्रादिभिरितिसमासः अभिरामं सुंदरं महार्थं
अर्थगांभीरं निगद्य तूष्णींबभूवेत्यर्थः जुषीप्रीतिसेवनयोः लिट् कथंभूतो राजा मध्येसभंसज्जनवंदनीयः आराममूतो रामः प्रसन्नसादक
घंभूतो रामः सज्जनेवंदनीय इति श्रीरामविशेषणमपिघटते मध्येपाठाद्देहलीदीपन्यायेनोभाभ्यांसंबध्यते वदि अभिवादन स्तुतौ:

रा नै री
१२

तृतीयासमासः आरामभूताउपवनत्वं प्राप्तः पारमध्येषष्ठ्यावेतिमध्यशब्दस्य पूर्वनिपातः अयंभावः शतानंदयानेनाक्रान्तेनच
पितृजनकेप्रीतिमानभूद्रामः अथनलपक्षे सराजेहंसः हंसीनांराजा महार्थंवचनमभिधाय मोनंसेवितवान् कथं अभिरा
मं सुंदरं रामोत्रनलोपीतिसुंदररूपत्वात् प्रागेवोक्तं लेशमोस्तिवलेशमोनीलचारुसितेत्रिषुइतिवचनात्नलस्यप्रकोपनत्वात् न
लायेतिशेषः मध्येसभंतत्रसभालोकाप्रसन्नोभूत् कथं० आरामभूतः ज्ञानोपदेशद्वारातापापहारकत्वात् अनएवो
द्यानत्वंप्राप्तः सज्जनैर्वंदनीयः दयाक्षमार्जवसंतोषादिशालित्वात् त्रिभिर्विशेषकं तदेवत्वरणम् २८ विदर्भभूः प्रापिविना
यकेननरेशितुः शासनहारकेण सुतस्यपाणिग्रहणोचिरायमाभूदितिप्रीतियुतोवदद्दरम् २८ विदर्भभूरिति रामपक्षे
विनायकेन विदर्भभूः प्रापि विनायकोगणपतौशिक्षकेदंडधारके इतिविशेषशिक्षकेनशतानंदेन दर्भीग्रंथे मैदोर्भि
दर्भीग्रंथः विशिष्टादर्भाग्रंथायत्र यागशिष्टमार्गस्यादयोग्रंथा अत्रस्ताने थांतदलकायत्रनाहभासा केनभूः प्राप्तेत्यर्थः कथं० नरेशितुः
शासनहारकेण नराणामीशिताजनकः तस्यशासनस्यहारकेणज्ञापकेन हस्रहस्तोवल्कलतीरि ईशाप्रैश्वर्येतत्र प्रीतियुतः
सन्मुनिः सुतस्यतत्पुत्रस्य पाणिग्रहणोचिरायमाभूदिति वरोदशरथंगत्वावदत् देवोदृते वरश्रेष्ठेत्रिषुक्लीवमनाक्रियेइत्यमरः
वरः श्रेष्ठः पुत्रोयोरामोयस्यसः अकारोवासुदेवः स्यादितिकोशः वराशब्दस्यद्वितीयेकवचनेवराभितिरूपमत्रबोध्यं जनकप्रेरितोहमा
गतः धनुर्भंगानंतरंविवाहोनिर्णीतः ससैन्यामात्यस्त्वंमिथिलांदुतंयाहीतिभावः अथनलपक्षेव्याख्या पूर्वंनलः प्रसन्नादहंस
वचनमाकर्ण्यस्तुकं तत्पदेनभज्यते यदिभवान्दोमेशक्र स्तर्हिगच्छतुकार्यंकरोतितिप्रसादेहेतुः विनायकेन वीनांनायकेनहं
सेन विदर्भभूः विदर्भदेशभूः प्रापि वाराकेननंदानादतेनश्राद्धेजिघांसतानंदानुगच्छता दर्भाश्चरणानोडुदकाडुत्पाटितास्तस्मा
द्विदर्भदेशात्वं ज्ञातमितिहकथासरित्सागरेद्रष्टव्यंकथानुसंधानम् कथं० नरेशितुः नलस्य शासनहारकेण आज्ञापितवार्ता

राम
१२

२१४

ज्ञापिता पार्थिवेन नयेसुत स्वयमरः विनायकोहंसः वरांयसपतींतत्रावदत् सुतस्य राज्ञः त्वयो दमयन लक्षणत्वमारिणी ग्रहणोचितश्च
विलंवेन मा भूदिति कथं० प्रीतियुतः सुप्रसन्नैश्वर्ययोदितिधातोः सुतइ निरूपमम् गिरहंसो च संज्ञायां ब्रह्म मराल वचनं ब्रह्मणा देवे
नालिखितामिदं स्वीकृत्य सविसृष्टिस्त्वयसीतिभावः १९ भैमीं गुरुसौगुम्फित मूर्तिं मारामेव तस्तौ दारविधानशोभः यदी हरा मो निन
येद्विदेहरूस्तदेव सार्थकमनुपैतिनान्यथा २० भैमीमिति रामपक्षे यदीह रामो भैमीं निनयेत् तदेव विदेहस्य सार्थकमनु
पैति अन्यथा न कथं भूतो रामः आराद्भवत्स्तौ दारविधानशोभः कथं भैमीं गुरौ गुम्फितमूर्तिं दशरथं किमुवाचेत्याह यदि इह अत्रावस
रे भीमो सत्करात् स्वयस्तः भीमो जनकः तस्यापत्यं स्त्री भैमी अन्यस्मान्न पात्रसंभविष्यस्य भीना स्तीति भावः हिङ्कुतिहिंघ्र नासीताम त्रपरिसी
यचेत्प्रापयेत् तदेव सा पुरी विदेहानां जनकानामभूः सार्थकं प्राप्नोति नान्यथा श्रीसंकाशस्य नारायणेनैव रामेण संयोगमर्हति उत्कर्षो
यशालित्वं तेषां मध्ये वो चितं भवति अन्यथा नैव कथं भूतो रामः भवता हृता उद्दारविधानशोभा यस्य सः भवता तत्र श्रीघ्रंगतमम् अतो जनकप्रे
रितो हंसमागतं इतिश्यते कथं भैमीं गुरोः शीलसौंदर्यादिभिर्गुम्फिता मूर्तिर्यस्याः एवं च विलंबेन कार्यां ध्येयं तत्व भित्तुकं भवतिया
तानेदं तत्सुतिना अथ नलपक्षे व्याख्या हे राजन् पुत्रियदि तामिति शेषः इह राम इःकामस्तमपि हन्तितां तुपनीतिरूहः सर्वासो अथ अतिसु
सौंदर्यैरा
दरो नलः आत्मपुरं निनयेत् परिणीय गच्छेत् भीमस्यापत्यं स्त्री भैमीं तां त्वात्र राजानं निनयेत् तदेव विदेहस्य पञ्चाशं वेदनं विदेनिर शोभते विद
याद्वुद्धेव दूरात्मापारः क्रियामात्रयेषां ते विदेहाः नीतिपारगाः पारीणास्तेषां भियंभूः सार्थकं समूहात्मत्वमनुपैति नान्यथा अन्योसै तां ददानो
भीमो गुरुम्भाय लोके रूपकुत्सिष्यति इतिहार्दोभिप्रायः कथंभूतो नलोरामशब्दलक्षितः भवत्स्तौदा रविधानशोभः भवता हृता कंठे
मालाप्रक्षेपेण भवत्स्वयंवरे उद्दार विधानस्य शोभायस्य सः सर्वेना मोहतिमात्रे पुंवद्भावइति वार्तिकवचनं भवता हृता भवत्स्तना
इति रूपनिष्पत्तिर्वोध्या कथं०तां गुरौ सौगुम्फितमूर्तिं आराद्दूरसमीपयोरित्यमरः आरात्समीपे कटकाले विवाहस्य वयथा सायाथाय
तनीयं त्रिष्टुप्जगत्यो रूपजातिः प्रस्तारभेदव शादवमेया छदश्चितित त्वेः २० सराजहंसो निगरूतां तसं वित्सन्न केजो
यापुरमाजगाम विहायसारवेचरश्च हैव नभोविमाने हि वदी तिवर्य्यैः २१ सराजहंसइति रामपक्षे सराजहंसोपि पु

रा.नै.टी.
१२

13

रमाजगाम राजश्रेष्ठो दशरथोपि पुरीं मिथिलामागात् कथंभूतो ऽगाधहीनसंवित् ध्वीसं विद्वान् संभाषा क्रियाकाराजिनाम-
स्त्विमरः क्रियाकारः सकेनइत्यर्थः न ह्यगम्यक्वाप्यहर्निशं पुरस्कृत्य तिसंप्रजगामेति तात्पर्यार्थः कथं० सत्तर्कजोषां संतस्तर्कोयस्मि
न्स गोतमस्तस्य धाना ग्रन्थे च मुनयो यत्र सत्तर्कं जुषंते इति सत्तर्कजोषा ग्रर्वाग्ग्राघच्च् ग्रसंसंनीति पूर्वविशेषणं कुतर्कं ग्रयथा
यत्र सत्प्रेपि नास्ति किंभीहः किं कायदृसादिरूपः ताहृशीं नगरीं नभो विमानैरिव वीतिनिवृष्यै: नभः आकाशं वेगेन मानइव मा
मानैर्धातुः उत्प्रेक्षालंकारः नभसो विशेषेण मानैर्येषां ते वीतीनां तुरगाणां वर्या श्रेष्ठास्तैरश्वैरतिशीघ्रं जगाम सपरिच्छद इति भावः
घोटकेवीतितुरंगइति [illegible] कोशः केन कइव विहायसा खेचरहंसइव उपमालंकारः शाद्यालंकारसंसृष्टिः काव्यं काव्यप्रकाशोक्तं सुदीह
तं ग्रथ नलपक्षे व्याख्या स राजहंसो ब्रह्मसमरालोपि सत्तर्कजोषां नलनगरीमाजगाम विहायसाकाशमार्गेण इत्यन्वयः कथं० ग्र
हीनसंवित् ग्रवश्यं तस्येव नलस्य वृत्तांतं कर्ताहं इति दमयंतीतः प्राप्तनिःसंदेहः संकेनः संवित्संवेत्न इति प्रागेव ग्रवगतमं कइव खेचरह
त्रस्तागरुडइव केः सार्द्धं तैः स्वकीयैर्हंसैर्बांधवैः सार्द्धं कैरिव नभसि विमानैरिव व्योमयानैरिव विरंचेर्विमानत्वात्तेषां वीनां पक्षिणामी
निर्गतं ते नगतेन वर्या श्रेष्ठाः तंडीनोड्डीनपारिशणाः संसहेतिनिर्गलितोर्थः विशेषणासत्त्वे बहुलग्रहणाद् ढः शिंशपा शिंशपावृक्षइ
तिप्रयोगा जायते इति भाष्यभाष्यव्याख्यानादीनि वृष्यपरानिपातो जातइति बोध्यम् ग्रत्रो पेंद्रवज्रेंद्रवज्रयोरुपजातिः २१ पुरस्क्रि
यांतस्य यथाविधानं विधाय हंसप्रवरस्य राजा वार्त्तां किलाचूचुददप्रमेयं सुसत्पवंघंगशासेमानम् २२ पुरस्क्रियामिति राम
पक्षे राजा ग्रप्रमेयं दशरथं वार्त्तामचूचुदत्किल किं कृत्वा हंसप्रवरस्य तस्य यथाविधानं पुरस्क्रियां विधाय कथंभूतं दशरथं सुसत्पव
घं पुनः कथं० गशासेमानं प्रकरणाद्दशरथः प्रक्रांतः वार्त्तं फल्गुन्यरोगे चेत्यमरः कुशलमित्यर्थः चुदिः एछायामपि वर्त्तते ग्रहमपी
दमचोद्यं वाद्यं इति [illegible] प्रयोगात् विक्रमादित्याप्रमानुमशक्यं ग्रप्रमेयं साक्षिलिङ्गचेति कृत्प्रत्ययः हंसः सू
र्येमराले चहंसो जीवात्मनि स्मृत इति यादवः हंसानां राज्ञां प्रवरस्य श्रेष्ठस्य तस्य पुरस्क्रियां पूजां विधाय हत्वा कुशलपत्रच्छेति तात्पर्या
र्थः वरः शुभिकाए चेति पक्षे यतः ग्रतिसत्पवचनमित्यर्थः गशोनसेनासम्यक् हेन से यमानं ग्राराध्यमानम् ग्रथ नलपक्षे राजा नल

दि

राम
१२

स्तस्य तांसप्रवरस्य हंसःसम्प्रहृष्टस्य तस्यसम्प्रहृष्टइत्यर्थः यथाविधानं विधानमनतिक्रम्येत्यव्ययीभावः शुद्धिपांपूर्वां विधायवार्तिक
त्साणमन्वयुदत् किलपुराणप्रसिद्धं अनुपमं सम्यगादिनं गगनेन हंससमूहेनक्षेअमानं अन्वीयमानं उपजानितहं २२ गुरुर्वसिष्ठःकापदस्वेन
पुनःकुर्नैवाह्निकवर्ष्यादिषे वावर्तनंसाक्षात्पूर्वमेववक्ष्यन्तेपत्वाहचनविदेहः २३ गुरुरिति रामपक्षेव्याख्या चपुनर्विदेहस्त्वमित्याह वसिष्ठोगुरु
रयंवैवाह्निकवर्ष्यादिषे सतिवर्तते अर्थवशाद्विभक्तिपरिणाम इति परिभाषा [illegible] तस्याःकरपद्धवेनश्रीरामकरपद्मं युनक्तु विवाहेदीक्षतीति
वैवाहिकाः शशिकरस्मूलादिभगणाज्योतिःशास्त्रोक्ताः संतितादृशो वर्ष्यनिर्वर्धमे संयोजयन्तु दिष्टु कालेप्रशस्ते वधूः सीताधनुर्भंगानंतरवाचनेनइ
र्वमेवाहूतं वतुवरस्ये [illegible] अतएवहमेनु [illegible] विस्मरः अवारीदितिमालयेतिभावः हेनृ
पेतिसंबोधनं जनकीयं अरणीयान्विलंबोपिमम नास्ति घटकनाम वदंधीनेतिभावः अथनलपक्षेव्याख्या चपुनर्विदेहस्त्वमाह वेःपक्षिणो
देहोयस्यसः अदेतिविभूवेत्यर्थ मयंवर्तते हेनृप वसिष्ठः सुमतिः पुरोधाः अतिशयेनवशीवशिष्ठः सुमतिशायनं इष्टन्प्रत्ययः गुरुर्महान् गुरुर्नि‌षे
कादिकरोपित्रादेगुरुरेकंत्रिरिति इजेरालघुनोभ्याषिगुरुरभ्रतिवाअवनदूतनिविस्त्र महान्विद्वानुपमतिरित्यर्थः त्वीपकरपद्धवेनत्वदीयकरपद्धवं
युनक्तु युजिर्योगे लोट् अहंतथावाक्षिलामभोयथानलमेवस्वयंवरेवदिष्यामिपुरुषांतरं नाभियहसामपिनकरिष्य इतिप्रश्नः [illegible] साभ्रे
यःपरंब्रह्मवाकादरीरथंगमनमात्रविलंबोयंपदार्थ इतिभावः ब्रह्मयानत्वात्कामरूपितातस्य संप्रतिविदेहत्वं स्वीकृतमितिध्वनायितुविदेह
पदंप्रक्षिप्तं २३ सजालपादःपुरमाजगाममहेनलोघोररागतोभ्ययासीत् तत्रांतरेदेवऋषिश्वनाकंश्रुत्वा [illegible] जवेनजिन्वन् २४
सजालपादइति रामपक्षे सजालपात् अःपरं आजगाम अनलःसन्घोररागतोमहेअभ्ययासीत् तत्रांतरेनाकंदेवऋषिश्च जिन्वन् पाकास्यदं
जवेनप्राप जलघातने जालंघातनंतेतेनसहवर्ततेइतिसजालाः हिंस्वाराक्षसा सादयस्तेषुपादोयस्यसः रक्षोमूर्द्धसुपादप्रहारदानक्षमः श्रीवासुदे
वोरामः परंपितरं दुरानाभीजराः परा इतिकौपकोशे एपालनपूरणयोः पिपर्तिपालयतीतिपरः पोषकंपितरंपूर्वमाजगाम स्वकेतादागतं
प्रत्युज्जगामेत्यर्थः ततोनालःसमर्थीयस्मात् अलंभूषणपर्याप्तिवारणेषु अलतीमलःपचाद्यच् नअलोयनः घोररागतो [illegible] आद्या
दिभ्यउपसंख्यानंवार्तिकेनतसीपार्श्वेनसिप्रत्ययः सर्वस्माद्धादरंयानंपुष्पकंपदं वधोरारातमितसमरः वाहनेन महे विवाहोत्सवशालायाम
भ्ययासीत् अगमत्सीरयापार्श्वमितितात्पर्यं तत्रावसरेदेवोसोजोदयारथप्रांधवपांसि [illegible] नाकं नविधतेअकंदुःखंयस्मिन्सःनाकोज्ञानपूर्णः

ःनपऐश्वर्ये
कद्रवतेपूर्य
धातोः

प्रतानंदारत्वादं नंजनकं जिन्वन् प्रीणयन् पाकशासनं इंद्रास्पदमनुलक्ष्यानं आस्पदं प्रतिष्ठायांनिपातनं उदाहरणानंशाप एषक्रपर्षक्र जिविप्री
णने जिन्व न् प्रीणयन् अथनलपक्षे व्याख्या सजालपादो हंसः जालपादोमरालेस्यादिति॰ जालाकाराः पादाअस्येतिसहंसउत्तसपदं
सलोकमगात् तत्रसहेनलोधोरणातोधोरणेन धोरणागमनं गतिहस्य लक्षोपेचंचमी महे विवाहस्थालायांस्वयंवरे अभ्यासीत् तत्रांतरे देवकृ
षिनारदश्च समासेप्ययंप्रवृत्ति भावः कस्मकद्र इति जवेन वेगेन जिन्वन् प्रीणयन् नाकंनिरंतरस्तुवंस्त अकंपापेचकुःखे वेतिविश्वः नभ्रासत
पानिनिमिषन्निति भावः पाकशासदममराकर्णाप्राय पूर्ववत्सुगजातिरुत्तमः राजाभट्टारकोदेवइतिकोशः २४ अपूपुजदिति स्रगंधमालैर्दैवं
मुनिंसंविधयायथावत् भैमीं सुरतीं प्रभयानिसर्वां जिष्णुर्विवोढुंयततेनर्किंवा २५ अपूपुजदिति रामपक्षे अतिसर्वः जनकः श्री
नविज्ञानसंपन्नासर्वानतिक्रांतोजनकः विप्सरगंधमाल्यैर्यथावत् देवं दृश्यार्थं मुनिं वसिष्ठं गुरुं तेषां संविधया सामग्रा मधुपर्कादिभि
रपूपुजत् आनर्च पूजपूजायांचौरादिकोधातुः चङुपरे गौणरूपं उत्तरालंकारेणआहचेति लब्धं जिष्णुर्जयप्रत्ययांतः रामप्रभयाकांत्यासु
रतींभैमींसीतां भीमाधनुस्तस्यभीमोजनकः तस्यापत्यं तत्सदृशीमिति वामन टिड्ढाणञिति ङीप् वाऽवधारणेऽप्रश्नेवा विवोढुंपरिणेतुं नयततेकिं
यतीप्रयतते एतावद्विलंवोनकर्तव्यः सुलग्नातिवर्तनमन्याय्यमितिभावः अथनलपक्षे जिष्णुपुरंदरः जिष्णुर्लेखर्षभः शक्रइतिवचना
त् यथावत् तदर्हमितिःसंविधया विधाविधौ प्रकारे चेतिकोशः विप्सरगंधमाल्यैः विष्टरआसनं गंधश्चंदनं माल्यंमाला एभिरुपचारैर्दे
वं मुनिं नारदर्षिं अपूपुजत् आनर्च उत्तरालंकारेण तद्वाक्यं वक्ष्यमाणमाह हे जिष्णुः पुरंदर भवान् अतिसर्वांभूत्वा प्रभयासुरतींभैमीं वा
शब्दःकस्मे निपातानामनेकार्थत्वात् विवोढुं नयततेकिं आश्चर्यमिदं इंद्रासपातवपल्युरूपयाकिंभवति यदिदमयंतीस्वयंवरे नलभ
सतीति त्रिलोकीपतसमिमानित्वंतवाश्चर्यमिवेति धीनितर्म पूर्ववदुत्तमम् २५ आनंदपादोनरमाहसोरंवचोविलंवंगमयन्सु
लग्ने जितोर्वशीकांसुरराट् विलोकितुं वैवाहशालांसमहीरः प्रतत्वे २६ सुगमम् आनंदेति रामपक्षे आनंदपादोनरः शतानंदो
नाम सोरंदशरथं सरस्परस्थं स्फोटापत्यं पुभान्सोरः तं वचआह सुलग्ने विलंवंगमयन् प्रीणातं ज्ञापयन् यएवकालस्पर्धीसएवज्ञाना
थीः नस्विवपुरुमन्यसदृशाधिकरणेनार्थोहपर्थगतिरितिभावात् किमाहेत्याह अविलंवमस्तु विलंवाभावोस्तुकार्य इति सुरराट्
रामोजितोर्वशीकांसीतांविलोकितुं द्रष्टुं नद्दृनश्चेतिकषु वैवाहशालांसमहीरः प्रतत्वे नलपक्षेचरयाजगाम अथनलपक्षे आनं

शब्दोत्तरः सत्यं ज्ञानमानंदं ब्रह्मेतिश्रुतिः आनंदस्य श्रीरूपस्याख्यब्रह्मणः शब्दउपसर्गाश्च विष्णोरेव शब्दनं शब्दः भावेघञ् अद्वैतब्रह्मनाम
कीर्तनमेवउत्तरं यस्य स नारदः सोरंसुराणामीशं तस्य दमितमरुत् सुलम्बोदमयंतीविवाहलग्ने श्रविलंवशी ध्रुवगमयन् ज्ञापयन् वच आह पू
र्वोक्तं वचनम् भुजगादेरित्यर्थः सुराणामिंद्रः जितांवशीकृतां विलोकिनु वैवाहकाले विवाहकर्तारोभूपावैवाहाः शोभेइत्यराः वैवाहानांशाजोभ्या
ला वेवास्यकालं विभाषासेनेतिनपुंसकत्वे ह्रस्वत्वेवोध्यं उद्विग्नदेसख्याहाः एतत्वेरे त्वरयप्र ब्राजोदित्यर्थः कथंभूतः यस्मादिसहितः उपल
क्षणतया माख्यानं काशीतिः सहमार्जारैरितिवत् त्रिष्टुप्जगतोरूपजातिवृत्तं २६ आमोदवांस्तपवनः शिखेवेस्वः कौसुमेक्रांतपदुद्विरेफः आ
तिथ्यशीलानलआननोत्सदाप्रियासमक्षंगतउग्रतेजा २७ आमोदवानिति रामपक्षे स्वः कौसुमेक्रांतपदुद्विरेफः आमोदवान्पवनः तेशिखेवे
कुसुमानांसमूहः कौसुमं तस्य समूहरूपवृन्दस्य स्वर्गस्य कौसुमं मंदारपारिजातं तत्रोक्रांताः पत्वोषुजनप्रवीणायस्मिन्सः पवनोवायुः तंराम भार्गवं
तत्प्रणोचरतदासेवितवान् वहस्सेवनेलिट् उग्रतेजावान्निश्चयेन तदानले वैवाहिके भोजत्वल्लसतिआतिथ्यशीलस्तथाननोतनोत् देवताकैरे
रपरिमाणजन्मायथ्यंतंप्रियायाश्चकारेत्यर्थः प्रतिथ्यशब्दकैरितिसुट् आननमादिताख्यग्र थित्वात्ङीप् अस्थिभिरस्थीनिसंदधातीतिवचनात्
प्रतिथ्यशीलः सहायेस्मादातो हरपुरोगयोरितिविश्वः कथंभूतः प्रियासमक्षंगतः अंचलग्रंथनं तरमंडपे हायने प्रातद्वयसमक्षं भावः प्रियासीता त
स्याः समक्षं प्रत्यक्षंगतः प्रतिपरसमनुभ्योक्ष्णः इतिसमासांतः अथनलपक्षे उग्रतेजानलइंद्रसमदादोतं प्रातिथ्यशीलमाननोत् चकार इंदेरा
त्मेवाख्यत्काम अथावरस्तायगच्छंतद्गनविष्णुयामहृयाकोपिजनोनदृष्टेत्युक्तः कथंप्रियासमक्षंगतः आमोदः सोतिनिर्हारीतिकोशः स्वःकौ
सुमादिविशेषणं कथासीदर्थ्योतकं पक्षद्वयेपितुल्यपरिकरालंकारः त्रिष्टुप्जगतोरूपजातिवृत्तंवोध्यं २७ नारस्यसोगोचरस्य वहारंपथ्य
सुवीतस्वयमेवतत्र विष्णुयतांकिंजगदीश्वरेणसंपर्चनं वामहृतश्चरेलिं २८ नारस्येति रामपक्षे तत्रशालायांप्रक्रांतत्वात्पूर्वसंतनकः
कन्यापितृक्षः अविषयः एकांतत्वात् हारंपथ्यसुवीत् अस्ताबीत् हरेर्नारायणस्यावनारंनारदाद्युक्तंरामं वर्णितवानित्यर्थः इत्याहचोत्तरालेकारेण
तदेश्मवंधामविधायजगदीश्वरेणसंपर्चनं संयोगंयत्कोकोवामः प्रतिकूलकारी अत्रकंपुरुषांतुरंगछेत् आत्मरेत्यर्थः तस्मादुचितकारित्वं
संप्रतिममेवर्हणं किमन्यत्कुत्सितमेव अथनलपक्षे नारस्परक्षिवर्गस्य राजमंदिरेगोचरेतद्गनविष्णुयासनलस्तत्रकन्यापुरेस्वयमेव

श्री

६१

3

रा.नै.टी
२५
15

